Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
OPEN ACCESS
© 2024 GISRRJ | Volume 7 | Issue 6 | ISSN : 2582-0095

# ऐतिहासिकविजयकाव्येषु यवनात्याचारः प्रतिकारश्च

**क्षुदिराम हालदार**
शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

**Article Info**
Volume 7, Issue 6
**Page Number :** 101-107

**Publication Issue :**
November-December-2024

**Article History**
Accepted : 10 Dec 2024
Published : 20 Dec 2024

**सारांशः**– विश्वस्य सर्वप्राचीनविकसितसभ्यतासु भारतीयार्यसभ्यता अन्यतमा। तस्मिन् समये आर्यसभ्यतायाः संस्कृति-विज्ञान-दर्शन-कला-अर्द-साहित्यादयः सर्वोन्नतिस्थाने अधिष्ठापिता आसन्। वहिर्विश्वे यदा विभिन्ना वर्वरसभ्यता परष्परस्य हिंस्राग्रासीदुर्वृत्तिनीतौ मग्नाः आसन्। तदा भारतीयार्यसभ्यता विश्वकुटुम्बत्वभावनायाः उदारनीतौ विश्वस्ताः–

**"अयं निजः परोवेति गणनारम्भे लघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्बकम्।।"**

आर्यसभ्यतायाः विश्वकुटुम्बतत्वभावनायाः उदारनीतौ धनैश्वर्येण परिपूर्णे भारतवर्षे लोभाकृष्टेन निष्ठुरयवनाः प्रविष्टाः। लिप्सुभिः हिंस्रात्याचारिभिः यवनैः भारतं प्रविश्य धनलुण्ठणं मन्दिरध्वस्तं मूर्तिखण्डणं स्त्रीनिर्यातनञ्च पाशविककर्मणि नियुक्तम्। कैश्चित् यवनैः भारतवर्षं शासनं कृतम्, आर्यजातिनां बलप्रयोगेन धर्मान्तरणञ्च अपि कृतम्। यवनानां अत्याचारं निर्मूलकरणाय बहवः भारतीयाः घोरसंग्रामे लिप्ताः अभूवन्।

**कूटशब्दाः**–श्रीशदत्तः, मधुराविजयम्, यवनैः, राणाप्रतापः ,वीजापुरशासकेन इत्यादयः।

**प्रस्तावना**– वैचित्रमयविश्वे सूर्योदय-सूर्यास्त-ऋतुपरिवर्तनं-उत्तुङ्गपर्वत-गभीरार्णव-शस्यश्यमलाधरित्र्यादिभिः सहृदयानां चित्तानुभूतिः आकर्षिता। विश्वस्य सौन्दर्यवर्णनं वैदिककालादारभ्य आवहति। जीवनानुभूतेः परिनिष्ठिताभिव्यक्तिरेव साहित्यम्। 'सहितयोः भावः साहित्यम्' अर्थात् शब्दार्थयोः सामञ्जस्यपूर्णेन सहभावः साहित्यम्। 'हितेन सह सहितं तस्य भावः साहित्यम्' इति व्युत्पत्त्यानुसारेण मानवहितस्य सम्पादनं येन क्रियते तत् साहित्यम्। राजशेखरेण गद्य-पद्यशैल्या रचितं साहित्यं काव्यमिति संज्ञा प्रतिपादिता। साहित्यविधा पञ्चमीविधां स्वीकृत्य काव्यपुरुषस्य वधूरुपेण प्रतिपादिता–"पञ्चमी साहित्य विधा"(काव्यमीमांसा, 2/ शास्त्रनिर्देशः)



**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अतीतघटनायाः क्रमबद्धाध्ययनमेव इतिहासः उच्यते। आङ्ग्लभाषायां History इति कथ्यते। Historiyaइति ग्रीशब्दात् History इत्यस्य व्युत्पत्तिः, यस्यार्थः स्मरणनिरीक्षणानुसन्धानमादिः । संस्कृतभाषायां 'इति+ह+आस' शब्दत्रयेण इतिहासः इत्यस्य व्युत्पत्तिः स्वीक्रियते। यस्यार्थः निश्चितरुपेण एतादृशी स्थितिः आसीत्। इतिहासः शब्दस्य प्राचीनतमः प्रयोगः अथर्ववेदे प्रप्यते-

**स वृहती दिशां अनुव्यचलत।**

**ताम् इतिहासश्च पुराणं च जाताश्च**

**नाराशंसी चानुव्यचलत्।।" ( अथर्व, 15/1/7)**

अर्थात् महत् लक्ष्यं प्राप्तये गतिशीलराष्ट्रस्य अनुसरणम्इतिहासः, पुराणं, गाथा नाराशंसी च कथ्यते। शतपथब्राह्मणे इतिहासपुराणनाराशंसी- गाथादीनां एकत्रोल्लेखेगनानुमीयते यत् इमानि तत्त्वानि इतिहासस्य मौलोपादानमासीत्।

भारतीयैतिहासिकभाण्डारस्य परिपूरणाय महत्त्वपूर्णतत्त्वस्य स्रोतरुपेण साहित्यं संस्कृतवांमये उपस्थापितम्। प्राचीनमनीषिणा स्वस्य साहित्यं सर्जनाय ऐतिहासिकनृपादिनां विषयवस्तुरुपेण स्वीकृतम्। यथा अश्वघोषस्य बुद्धचरितं, वाणभट्टस्य हर्षचरितम्, विशाखदत्तस्य मुद्राराक्षसमादयः। चरितस्योपरि लिखितं काव्यं तत्कालीन-इतिहासस्य तत्वमुत्घाटितम्। अतः इतिहासाधारेण रचितं काव्यं ऐतिहासिकाव्यं नाम्नाभिधीयते। ऐतिहासिकाव्येषु चरितकाव्यं विनापि विजयनाम्ना काव्यं प्रप्यते। यथा पृथ्वीराजविजय-प्रतापविजय-मधुराविजय-शिवराजविजयादिः। अस्मिन् विजयकाव्ये सामाजिक-सांस्कृतिक-राजनैतिक-धार्मिकादिभिः सह यवनात्याचारः प्रतिकारश्च वर्णितः।

**विषयवस्तुः**-

ऐतिहासिकविजयकाव्येषु जयानकेन विरचितं पृथ्वीराजविजयमहाकाव्यम् अन्यतमम्। विजयकाव्यऽस्मिन् चौहानवंशस्येतिहासेन सह तस्मिन् समये यवनात्याचारः कविना उल्लेखितः। काव्यास्य प्रारम्भे विष्णोः स्तुतिप्रार्थनायां पुष्करतीर्थस्य वर्णनाप्रसङ्गे ब्रह्मणा म्लेच्छाक्रमणमुक्तम्-

**"चक्रे जगत्सर्गमहाध्वरान्ते मयापि यत्रावभृथाभिषेकः।**

**तत्राधुना देवगृहाग्रहार हिंसाक्लमं म्लेच्छचमूश्छिनत्ति।।"( 1/50)**

जगत्सृष्टेः समाप्तौ यत्र ब्रह्मणा अवभृतस्नानं कृतं तत्राधुना म्लेच्छाः देवगृहं निवारयन्ति,शिरच्छेदं कुर्वन्ति। पुष्करपुण्यायतने म्लेच्छाः पापमाचरन्तीत्यर्थः। पवित्रपुष्करतीर्थे चन्द्रार्काभ्यामुत्पन्ने रेवायमुने जनङ्गमानानां म्लेच्छानामुच्छिष्टादयः निपातिताः। सुलतानियुगे मातङ्गम्लेच्छगणैः वन्दीविप्राणां सन्तापाश्रुणा पुष्करः कोष्णः जातः। भगवतः ब्रह्मणः मुखात् आर्याणां दुरावस्थां श्रुत्वा म्लेच्छनिधनाय भगवान् भानुमण्डलात् अवतीर्णः-

**" यथा द्युसिन्धोस्सलिलाद्यथाग्नतः तथैव पुण्यादपि भानुमण्डलात्**

**महेश्वरस्यैष तनोसमुद्गतो जगद्विषां संहृतये गुहः पुनः।।" (2/15)**

चौहानवंशीय: अर्णोराज: म्लेच्छाक्रमणं प्रतिहतकरणाय पुष्करस्य दृढीकरणं कृतम्। और्णराजस्य महतीसेनाभि: म्लेच्छराजस्य सेनासमुद्र: विनाशित:। जनङ्गमानां म्लेच्छानां सेना प्राणैर्वियोगभयात् पलायिता। अजयमेरुभवानां भटानां शास्त्रघातै: यत्कर्तव्यमासीत् तद्धारीभूतै: आयसकवचै: वहव: तुरुष्का: मृता:। अर्णोराजेन म्लेच्छशत्रूणां वितारित्य अजयमेरुनगरे चतुर्दिशायां विजयपताका उड्डयिता। पृथ्वीराजचौहानस्य समये म्लेच्छगोरीणा आक्रमणं करणाय दूत: प्रेषित:। म्लेच्छगोरीपराभवं श्रुत्वा द्विषां विनाशाय राज्ञ: चक्षु: रक्तरञ्जित: भवति।

**"भ्रूकुटिकुटिल: पृथ्वीभर्तुर्गदन्नवनेश्शिवं**

**मिलदरुणिमा भाले कोपि व्यभाव्यत कालिमा।**

**जलधर इवाकस्मादैरम्मदेन सहार्चिषा**

**चिकुरसरणिं प्राप्त: कर्तुं प्रतापहतिं द्विषाम्।।"(10/51)**

'मधुराविजयम्' काव्यस्य प्रणेत्री गङ्गादेवी। सुलतानीयुगे दक्षिणभारते तुङ्गाभद्रानद्योपकुले स्थितस्य विजयनगरसाम्राजस्य परिचयोऽत्र प्रप्यते। यवनै: साम्रज्यविस्ताराग्रसीनीतौ उत्तरभारतं विजित्य दक्षिणभारते कूरदृष्टि: निक्षेपिता:। पिताबुक्कराजस्य आज्ञानुसारेण चम्पराजं विजित्य मरकतपुरि राजधानीं निर्माय प्रजा: पालनं कृतम्। काञ्चीविजयकाले बुक्कराजेन कम्पराजस्य पराक्रमं दृष्ट्वा मदुरानगरे क्रूरयवनशासनस्य विनाशाय कम्पराज: प्रेषित:। मधुरादेवी कम्पराजस्य समीपे तुलुष्कराजस्य विध्वस्ताक्रमणं उक्तवती। यवनाक्रमात् पूर्वं मधुरानगरी अतीव रमणीया आसीत् परन्तु यवनाक्रमणेन विध्वस्तसौन्दर्यहीननगरी व्यघ्रेण युक्ता भवति। मन्दिरस्य विष्णो: मूर्तिभग्नं कृत्वा तस्योपरि इष्टकस्तूप: स्थापित:। यवनाक्रमणेन मन्दिरे मन्दिरे मृदङ्गध्वने: परिवर्तेऽधुना फेरवाणा: भयङ्करनिनादै: मन्दिर: मुखरित:। प्राङ् मधुरानगरी मन्त्रोच्चारेण सह अध्वरधूमसौरभै: शोभिता आसीत् इदानींन्तु विस्रमांसगन्धै: मद्यपतुलुष्काणांसिंहनादै: हृदयविदीर्णा। जिघांसुयवनै: मधुरावासिनां निहत्य नारिकेलशाखायां नृमुण्डमाला स्थापिता–

**"मधुरोपवनं निरीक्ष्य दूये बहुश: खण्डितनालिकेरषण्डम्।**

**परितो नृकरोटसकोटिहार प्रचलच्छुलपरम्परापरीतम्।।" (8/8)**

तुलुष्काक्रमणेन यत्र रमणीनां मणिनूपुरप्रणाद: बभूव तत्र अधुना राजपथि द्विजवद्धशृङ्खलेन कर्णविदारित:। मन्दिरे पुरगोपवधूनां चीनपटावगुण्ठनत्वस्य परिवर्ते तन्तुवायजालिकया परिवृता। प्राङ्गणं वन्दीब्रह्मणानां अश्रूभि: दूषितम्। ताम्रपर्णानदीतटे निरन्तरं नृशंसै: निहतानां गवां असृग्भि: नद्या: जलं शोणितवर्णं धारयति। एवं रूपेण मधुराधिदेवी तुलुष्कनाथस्य अत्याचारं उक्त्वा तस्य विनाशाय दिव्यास्त्रं प्रदाय तुलुष्कनाथं वधार्थं निवेदयति–

**"अमुनाशु विशस्य दक्षिणस्यां मधुरायां पुरि कंसवन्नृशंसम्।**

**यवनाधिपतिं बलोत्तरस्त्वं विदधीथा: स्फुटमच्युतावतारम्।।"(8/29)**

मधुरादेव्यानुरोधेन वीरकम्पराज: पराक्रमेण सुसज्जितसानाभि: सह युद्धयात्ररम्भं कृतवान्। उभयोर्मध्ये तुमुलयुद्ध: प्रारब्ध:। शत्रुणां शस्त्रं निराकृत्य स्वस्य वाणेन विपक्षशत्रुसंघं धूलीश्चकार:। युद्धविद्यायां पारदर्शी कम्पराज: एकेनैव वाणेन

हस्तिना सह गजाधिरोहं भूमौ शाययितवान्। काञ्चीविजेत्रा कम्पराजेन अधर्मकारिनः तुलुष्कराजस्य रथध्वजा निपतिता। प्रवलसंग्रामादनन्तरं तुलुष्कनाथस्य प्रहारं निरस्तीकृत्वा दिव्यास्त्रेण कम्पराजेन तुलुष्कराजः वधितः।

**"स वञ्चयंस्तत्तरवारिधारां धाराविशेषप्रवणौपवाह्यः**

**अशातयत्तस्य शिरो निमेषा[दने]न कर्णाटकुलप्रदीपः।।"(9/37)**

यवनराजस्य वधादनन्तरं देवैः वीरकम्पराजस्योपरि पुष्पवर्षा वर्षिता। तुलुष्कराजे निहते दक्षिणदिशि शान्तदावाग्निवत् निर्मलः बभूव।

**"प्रशान्तदावेव वनान्तलक्ष्मीर्गतोपरागा गगनस्थलीव।**

**कलिन्दजा मर्दितकालियेव दिग् दक्षिणासीत् क्षतपारसीका।।"(9/41)**

श्रीशदत्तेन विरचितं 'प्रतापविजयं' खण्डकाव्यं। यवनसम्राडर्कवरशासिते राष्ट्रे भारते राजस्थानस्य मेवाडराज्ये महाराणाप्रतापसिंहः शासक आसीत्। असौ महाबली महाराणा दीनजनतापविनाशकः शत्रुसन्तापकः, गोद्विजपरिपालकः सनातनधर्मरक्षकश्चासीत्। अर्कवरशासिते भारते निष्ठुरात्याचारीयवना गोद्विजदेवादिन् विनाश्यन्ति। ललनाजनानामपहरणं बलात्कारश्च क्रियते। स्वस्य धर्मसतीत्वं रक्षणाय ललनाः अग्निकुण्डे स्वयमेव निक्षेपिताः –

**"इहैव बध्वो युगपत्सहस्रशः सुकोमला हा कलिकाऽङ्कुरादपि।**

**स्वधर्म-संरक्षण-हेतवे तनुं विदग्धवत्यो ज्वलने तृणोपमाः।।" (प्र.वि.-30)**

सर्वत्रैव यवनैः कलिकालमहिमा वितन्यते। अर्कवरस्य पितामहः बाबर नाम्ना गुणेन बर्बरः पाणीपतयुद्धं विजित्य मोगलसाम्राजस्य प्रतिष्ठामायास। कपटव्यवहारेण प्रसिद्धेन अर्कवरेण हिन्दुजनानां पराक्रमं क्रमशः नाशितम्। कपटवैवाहिकसूत्रेण भारतीयानां धर्मान्तरितः अपि कृतः–

**"स हिन्दुहा हिन्दुभिरेव सन्ततं विधाय सङ्गं बलतश्च लोभतः।**

**तदीयकन्याजन-सङ्गमाऽकुलः चकार तांस्तानखिलान् पदाश्रितान्।।"(47)**

अर्कवरस्य कपटनीत्या लोभी मानसिंहः वशीभूत्वा निन्दितकर्मणि नियुक्तः। मेवाडनरेशः राणा प्रतापः खेदं प्रकाश्य देशदुर्दशां प्रकाशयति–

**"क्वापि प्रतारणमलं ललनाजनानां दृष्ट्वाक्वचित् सुरजनप्रतिमाऽपमानम्।**

**हिन्दून्विलोक्य च पशूनिव हन्यमानान हा! हृत्तलं भवति मे शतधा विदीर्णम्।।"(56)**

यवनानाम् अत्याचारं निर्मूलकरणाय वीरप्रतापस्य आत्मत्यागः अनस्वीकार्यः। अर्कवरेण सह राणाप्रतापः सततं समरयज्ञे लिप्तः। मेवाडनरेशः क्रूरात्याचारिणां विनाशाय मेवाडनरेशेन दृढा प्रतिज्ञा कृता।

**"यावत्प्रभाहतमदो मम भारतं मा भूयः प्रभारतमलं भुवने भवेद्वै।**

**तावत्कदापि कथमप्यति नैव नूनं यास्यामि जन्मनगरं नगरं गरीयः।।"(51)**

पर्रपुटके खादिष्यति, विजने वत्स्यति, तृणासनेषु स्थाष्यति। सूर्यचन्द्रयोः उदयस्य दिशापरिवर्तने सति प्रतापप्रतिज्ञा व्यर्था न भविष्यति। यवनात्याचारम् उत्पाटनाय मेवेडनरेशेन सामन्तजनान् प्रेरणामूलकं वचनमुक्तम्-

**"सिन्दुरबिन्दुरिव भारतभूमिभालात् 'मेवाड' एवनैर्यवनैर्विलुप्तः।**

**भूयोरपि तं किल तथा परिरञ्जयेद्यः आयातु तत्कृत इदं प्रणतं शिरो मे।।"(102)**

प्रतापवचोभिः सामन्ताः उद्बोधिताः सन् युद्धाय प्रस्तुताः आसन्। महासमरप्राङ्गणे राणा प्रतापस्य कृपाणः शत्रुसैन्यान् छिन्धि-भिन्धिं कुर्वन् प्रतापहस्तस्य शोभां भासयन् विपक्षणां भयग्रस्तमकरोत्। प्रतापाश्वः चेतकोऽपि कुन्तटंकारं निशम्य केशरझंकारेण भयङ्करनादं कुर्वन् रणाङ्गणे विपक्षाणां मृत्युदूतरूपेण उपस्थितः। एवंरूपेण क्रूरात्याचारिणां यवनानां विनाश्य ज्वलन्तः साक्षी हल्दीघाटीप्रन्तरः।

श्रीमदम्बिकादत्तव्यासेन विरचितः चत्वारविरामसमन्वितः द्वादशनिश्वासत्मकः उपन्यासः शिवराजविजयः। उपन्यासेऽस्मिन् यवनानाम् अमानवीयः अत्याचारः तथा तस्य प्रतिकारस्य सजीवचित्रं चित्रितम्। ओरङ्गजेवशासिते भारतवर्षे अजेयदक्षिणभारते शिववीर शिवाजी महाराष्ट्रस्य नरेशः आसीत्। दाक्षिणात्ये एकाधिकाधिपत्यं स्थापनाय औरङ्गजेवेन प्रेषितेण सेनापतिना वारं वारं आक्रमणं लुण्ठनम् उत्पीडनञ्च कृतम्।

वीजापुरशासकेन प्रेषितपत्रवाहकयवनयुवकेन अपहृता ब्राह्मणकन्या गौरसिंहेन उद्धारिता। कुटिरस्थितायाः कन्यायाः क्रन्दनं श्रुत्वा योगीराजस्य जिज्ञासया मुनिवरेण यवनशासिते भारतवर्षे यवनानांम् निकृष्टक्रूरात्याचारः वर्णितः-"अद्य वेदाविच्छिद्य वीथिषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रैषु भर्ज्यन्ते, क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित् तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अपह्रियन्ते, क्वचिद् धनानि लुण्ठन्ते, क्वचिदार्तनादाः, क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः' इत्यव श्रूयतऽवलोक्यते च परितः।" (प्रथमः, पृ.-36)

एवं प्रकारेण ब्रह्मचारीगुरु-योगीराजयोः कथोपकथनप्रसङ्गे ब्रह्मचारिगुरुणा भारतवर्षे यवनाक्रमणस्य अत्याचारस्य च इतिहासः सम्यग्रूपेण कथितः। गजनीनिवासी यवनराजः महामदगोरी द्वदशवारं भारतवर्षं आक्रमणं कृत्वा मन्दिराणि विध्वस्तकृत्य, प्रतिमां नष्टीकृत्य, जनानाश्च दासीकृत्य शतशः उष्ट्रेषु धनरत्नमणिमुक्तादिनां आरोप्य स्वदेशं प्रत्यागतः। भारतलुण्ठनसमये बर्बरः हृदयहीनः धर्मविद्वीषी गोरिः वैभवपरिपूर्णं गूर्जरचूडामणि-
सोमनाथमन्दिरं धूलीश्चकार-"तत्र हि महार्हवैदूर्यपद्मरागमणिमाणिक्य-मुक्ताफलादिजटितानि कपाटानि स्तम्भान् शतद्वयमणसुवर्णशृङ्खला- वलम्बिनीं चञ्चच्चाकचक्यचकितीकृतावलो-

**चकलोचननिचयां महाघण्टां प्रसह्य संगृह्य महादेवमूर्तावपि गदामुतूतुलत्।" (प्रथमं, पृ. 58)**

एवं प्रकारेण ब्रह्मचारिगुरुमुखेन भारतीयानाम् उपरि यवनानां अमानवीयः निष्ठुरः अत्याचारः वर्णितः।

यवनशासकानाम् नृशंसात्याचारात् भारतमातुः स्वतन्त्रतायै शिववीर-गौरसिंह-रघुवीरसिंह-माल्यश्रीकादिनाम् अक्लान्तिकभगीरथप्रयासः अविस्मरणीयः। वीजापुरशासकस्य कपटसन्धिं ज्ञात्वा शिवाजी स्वयमेव कपटयोजना कृता।

गौरसिंहः गायकस्य छद्मवेशेन अफजलखानस्य शिविरं गत्वा सर्वं गोपनवृत्तान्तं उद्घाटितवान्। शिवाजिना स्वस्य सैन्याः अरण्ये अफजलखानस्य शिविरस्य चतुर्दिशि आत्मगोपिताः। शिववीरस्तु आलिङ्गनच्छलेन व्यघ्रनखपरिहितहस्ताभ्यां आफजलखानस्य कन्धरां व्यापादितवान्। तदन्तरं शतशः सादिनः यवनसेनाः आक्रमणं कृतवन्तः। गौरसिंहः अफजलखानस्य मृतदेहं नीत्वा सर्वेषां यवनसेनानां भीतिं प्रदर्श्य विताडितवान्।

दिल्लीश्वरेण अवरङ्गजेवेन प्रेषितः शास्ताखानः पुणानगं अधिकृतम्। शिववीराध्युषिते चत्वरे महादूर्गे शास्तिखान सपरिवारेण सह प्रतिवसति। पुणानगरस्य समीपे सिंहदूर्गे शिववीरः विराजते। परस्परं च छलाशङ्का युद्धाशङ्काश्च जरीजृम्भन्ते। महाराष्ट्रनरेशः महादेवपण्डितस्य छद्मवेषेण शत्रुशिविरं प्रविश्य सर्वं गोपनवृत्तान्तं उद्घाट्य ध्वान्तमार्गेण संकेतितस्थले माल्यश्रीकेण सह मिलित्वा यशवन्तसिंहस्य समीपे विविधविषयान् पर्यालोच्य पुणाधिकारस्य गुप्तयोजनां विदित्वा आलिङ्गनं विधाय बहिर्जगाम। गुप्तयोजनानुसारेण सशस्त्रमहाराष्ट्रवीरैः शास्तिखानस्य निवासं आक्रमणं कृतम्। महाराष्ट्रमण्डलीमण्डनः रुद्धद्वाराणि पदाघातैः विखण्डयित्वापश्यत्– गवाक्षेण स्त्रीभिः सह सेनापति शास्तिखान पलायमानः आसीत्। तदा शिवराजस्य चरेण क्षिप्तखडगेन करस्याङ्गुलिद्वयं च्छिन्नम्, तावत् सोलम्फयित्वा घनान्धकारे विलीनः। शिववीरेण महाराष्ट्रा म्लेच्छान् घ्नन्तीत्यवलोक्य व्यर्थहत्या निवारिताः। "विजितं सनातनधर्मेण, विजितं महाराष्ट्रराजेन" इति महानभूज्जयध्वनिः। एवं प्रकारेण महाराष्ट्रमुकुटमणिः शिववीरः यवनशोणितपिपासकः 'कार्यं वा साधयेयं देहं वा पातयेयम्' इति प्रतिज्ञया यवनात्याचारं निवारयति।

**उपसंहारः**– इतिहासः विविधानां विषयानां समुच्चयः विद्वद्भिः अभिमन्यते। ये सर्वे विषयाः इहलौकिकरुपेण मुख्याः ते ऐतिहासिकविषयाः भवन्ति। अभिनवगुप्तेन 'इतिहास' इति शब्दस्य व्याख्यायितुमुक्तं यत् 'इति' शब्दः प्रत्यक्षात्मकतायाः संकेतः। येषां विषयाणां जगति सत्यरुपेण संघटिताः तेषां विषयानामुल्लेखः इतिहासः। भारतवर्षे शुद्धैतिहासिकोपादानस्यअभावः आधुनिकविद्वद्भिः आक्षिप्यते।

ए.वी.कीथमहोदयेन लिखितम्–" **भारतीयसाहित्यसमृद्धेः अपि ऐतिहासिकविषयग्रन्थः एवमेन दारिद्रं यत् संस्कृतसाहित्यस्य विस्तृतकाव्ये एकोऽपि लेखकः नास्ति यत्र पण्डितैः ऐतिहासिकविवेचना कर्तुं शक्यते।**"(ए.वी.कीथः संस्कृतसाहितस्येतिहासः, पृ. 179)

विण्टारनित्ज महोदयेन लिखितं यत् **–"भारतवर्षे इतिहास-सम्बन्धितग्रन्थाः लिखिताः, न्यूनातिन्युनं शिलालेखाभिलेखानां एतादृशं विपुलसंख्यास्ति येषां तिथि निश्चितरुपेणाङ्किता।"** (विण्टारनित्जः प्राचीनभारतीयसाहित्यः, पृ. 23 अनु. लाजपतराय)

साहित्यक्षेत्रे भारतीयैतिहासिकोपादानं कविकल्पनया कालघटनादीनां वरीवर्धने सति विद्वद्भिः साहित्यिकोपादानं सादरेण स्वीक्रियते। संस्कृतसाहित्यजगति विजयकाव्येषु यवनात्याचारस्यैतिहासिकवृत्तान्तं अद्यापि भारतीयानां हृदयं क्लिश्नाति। म्लेच्छानां अमानवीयात्याचारं विनाशाय वीरपुंगनां आत्मनियोगः भारतमातुः हृदयेषु स्वरणाक्षरे लिखितः।

**सहायकग्रन्थसूची-**

1 मिश्र डा. रमाशङ्कर, शिवराजविजयः, ,वाराणसी, चौखाम्बा सुरभारती प्रकाशन, 2018

2 गोप अध्यापक युधिष्ठिर, शिवराजविजयः,विधानसरणी, कलकाता-700006, संस्कृत वुक डिपो, 28/1, 2019

3 पोतुकुच्चि सुब्राह्मण्यशास्त्री, मधुराविजयः, कोल्लूरुः, गुन्टुरुजिला, श्री अजन्ता आर्टु प्रिटर्सु, 1969

4 रायबाहादुर महामोहपाध्याय डा. गौरीशंकर ओझा हीराचांद,शर्मा पण्डित श्री चन्द्रधर गुलेरी, पृथ्वीराजविजयमहाकाव्यम्, सोजतीगेट, जोधपुर, राजस्थानी ग्रन्थागार, 2011

5. त्रिपाठी शिवकुमार, त्रिवेदी विशुद्धानन्द, प्रतापविजयः, वाराणसी- 221002 शारदा संस्कृतं संस्थान,

6, 2010,वन्द्योपाध्यायः धीरेन्द्रनाथ, संस्कृतसाहितस्य इतिहासःराजा सुबोध मल्लिक स्कोयार,कलकाता 700013, पश्चिमवङ्ग राज्य पुस्तकपर्षत्, 6,

7.,राय डक्टर अतुलचन्द्र, भारतस्य इतिहासः डा. कार्तिक वोस स्ट्रीट, कलकाता 700009,18 देवाशीष मौलिक, , 2003

**सन्दर्भग्रन्थसूची**-

1 काव्यं मीमांसा 2/ शास्त्रनिर्देशः

2 अथर्ववेदः 15/1/7

3 पृथ्वी.वि 1/50

4 पृथ्वी.वि 2/15

5 मधुरा.वि 8/8

6 प्र.वि.-30

7 प्र.वि.-47

8 शिवः.वि- प्रथमः, पृ.-50

9 शिवः.वि प्रथमं, पृ. 58

10 ए.वी.कीथः संस्कृतसाहितस्येतिहासः, पृ. 179

11 विण्टारनित्जः प्राचीनभारतीयसाहित्यः, पृ. 23 अनु. लाजपतराय